International Journal of Sanskrit Research 2019; 5(4): 123-126

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 123-126
© 2019 IJSR
www.anantaajournal.com
Received: 04-05-2019
Accepted: 06-06-2019

**गणेश नारायण स्वामी**
शोधछात्र,
जगद्गुरुरामानंदाचार्यराज स्थानसंस्कृतविश्वविद्यालय,
जयपुर, राजस्थानम्, भारत

**Correspondence**
**गणेश नारायण स्वामी**
शोधछात्र,
जगद्गुरुरामानंदाचार्यराज स्थानसंस्कृतविश्वविद्यालय,
जयपुर, राजस्थानम्, भारत

# पं.विद्याधरशास्त्रिकृते विश्वमानवीयमहाकाव्ये उदारवादिचिन्तनम्

**गणेश नारायण स्वामी**

**प्रस्तावना**

उदारवाद: एका एतादृशी विचारधारास्ति यस्यां वैयक्तिकस्वतन्त्रताया: उपरि अत्यधिकं बलं दीयते । एवमेव आधुनिकोदारवादिविचारधारायां लोककल्याणकारिराज्यस्य परिकल्पना स्थापितास्ति । उदारवाद: मानवस्वतन्त्रताया: मानवाधिकाराणाञ्च संरक्षणस्य एका शासनव्यवस्था विद्यते या प्रत्येकं जनं स्वतन्त्रतापूर्वकं स्वकीयव्यक्तित्वस्य विकासार्थं प्रेरयति । उदारवाद: मानवजीवनस्य प्रत्येकस्मिन् क्षेत्रे वैयक्तिकप्राधान्यं स्वीकरोति । उदारवाद: स्वकीयहितसाधने सामाजिकहितसाधने च सामञ्जस्यं स्थापयति । अस्माभि: ज्ञातं यत् उदारवाद: मानवस्य स्वतन्त्रताया: वृद्धौ विश्वासं करोति । उदारवादस्य मान्यतास्ति यत् स्वतन्त्रता नागरिकस्य प्रकृतिप्रदत्त: आजन्मनश्चाधिकार: अस्ति । उदारवादिचिन्तका: मानवीयविवेकशक्त्यां विश्वासं कुर्वन्ति । उदारवादिनां मतमस्ति यत् जीवनस्य सम्पत्तिधारणस्य स्वतन्त्रतायाश्चाधिकारा: प्रकृतिपदत्ताधिकारा: सन्ति । स्वतन्त्रताया: अधिकारान्तर्गते वैयक्तिस्वतन्त्रता, नागरिकस्वतन्त्रता, सामाजिकस्वतन्त्रता, राजनैतिकस्वतन्त्रता इत्यादय: सम्मिलिता: सन्ति । अद्य प्राय: सर्वेषु राष्ट्रेषु नागरिकाणां मौलिकाधिकाराणं संरक्षणमेव एतस्य विचारधाराया: समर्थनं करोति। उदारवाद: तासां परम्पराणां ऐतिहासिकानाञ्च तथ्यानां विरोधं करोति ये विवेकपूर्णा: न सन्ति । एष: धर्मनिरपेक्षदृष्टिकोणस्य समर्थक: अस्ति । एष: आर्थिकक्षेत्रे नागरिकाणां कृते स्वतन्त्रतापूर्वकं स्वकीयकार्यं कर्तुं स्वतन्त्रतां प्रददाति उदारवादिचिन्तनस्य मतमस्ति यत् व्यवसायचयने कार्यकरणे वा तत्र चार्थस्य निवेशने नागरिक: स्वतन्त्र: स्यात् । उदारवादिन: लोकतन्त्रस्य प्रबलसमर्थका: सन्ति । उदारवादस्य विचारधारा उदयकालादेव प्रतिपादयति यत् स्वतन्त्रताया: तस्या: च संरक्षणस्य सर्वोत्तमविधि: स: भवति यस्मिन्

प्रशासनस्य शक्ति: प्रजाया: सन्निहिता भवति । उदारवादस्येयं मान्यतास्ति यत् वैयक्तिकस्वातन्त्र्यस्य रक्षणार्थं लोकप्रभुसत्ताधारितलोकतन्त्रीयशासनप्रणाली एव सर्वोत्तमा शासनप्रणाली भवति । वर्तमानसमये उदारवादिनां पुरातनदृष्टिकोण: परिवर्तित: । अधुना सर्वे उदारवादिन: एनं स्वीकुर्वन्ति यत् प्रशासनस्य राज्यस्य वा उद्‌देश्यं जनकल्याणमेव भवति । राज्यस्य उद्‌देश्यं जनविशेषस्य वर्गविशेषस्य वा कल्याणं नास्ति अपितु सम्पूर्णमानवसमाजस्य हितसंसाधनमस्ति । आधुनिक-उदारवादिन: अद्‌यत्वे लोककल्याणकारिराज्यस्य विचारधाराया: प्रबलसमर्थका: सन्ति । एतस्मादेव कारणात् अद्‌य सर्वकारा: लोककल्याणार्थमेव कार्यं कुर्वन्त: दृश्यन्ते । उदारवाद: निरंकुशतावादस्य कस्यापि सिद्धान्तस्य समर्थनं न करोति । उदारवादस्य प्रमुखा मान्यतास्ति यत् प्रत्येकस्य राष्ट्रस्य शासनं तद्देशवासिनां इच्छानुसारं प्रचलेत् । अनेन एव उपायेन वैयक्तिकस्वतन्त्रताया: संरक्षणं भवितुं शक्यते । अत: उदारवाद: राष्ट्रीयस्यात्मनिर्णयस्याधिकारस्य प्रबल: समर्थक: अस्ति । एष: स्वशासनस्य सिद्धान्तस्य एव समर्थनं करोति । उदारवादिविचारका: समर्थकाश्च मन्यन्ते यत् प्रत्येकं जन: स्वकीयानां हितानां निर्णायक: स्वयमेव भवति । मानव: स्वजीवनस्य प्रत्येकस्मिन् कार्ये प्राकृतिकरूपेण स्वतन्त्र: भवति । आधुनिकै: उदारवादिभि: एकस्य जनस्य विकासापेक्षया समाजस्य कल्याणस्य कृते प्राथमिकता प्रदीयते । एतस्मिन् अर्थे राज्यस्य उद्‌देश्यं एकस्य व्यक्ते: विकास: न भूत्वा सम्पूर्णसमाजस्य विकास: भवति । उदारवाद: विधिसम्मतशासनमुचितं महत्वं ददाति । पुरातनोदारवादिचिन्तका: नूतनोदारवादिचिन्तका: च संविधानसम्मतशासनमेव स्वीकुर्वन्ति । सर्वे उदारवादिविचारका: विश्वबन्धुत्वस्य भावनाया: प्रबलतया समर्थनं कुर्वन्ति । तेषां मान्यतास्ति यत् सम्पूर्णसमाजस्य विकासेन एव राष्ट्रस्य विकास: भवितुं शक्यते । अतएव ते चिन्तयन्ति यत् सर्वे राष्ट्रा: परस्परं अखण्डताया: सीमानाञ्चादरं कुर्यु: । अनेन एव सर्वेषां राष्ट्राणां हितं सिद्धं भविष्यति । उदारवादिन: अन्ताराष्ट्रियसम्बन्धेषु शक्तिप्रयोगस्य प्रबलं विरोधं कुर्वन्ति । एवं उदारवादिभि: विश्वस्य शान्तिव्यवस्थाया: व्यावहारिकपक्षं प्रति विशिष्टं महत्वं प्रदीयते ।

उदारवादिचिन्तनस्योपर्युल्लिखिताया: अवधारणाया: सन्दर्भे अत्र पं.विद्‌याधरशास्त्रिकृते विश्वमानवीयमहाकाव्ये उदारवादिसंदर्भानामध्ययनं प्रस्तुतमस्ति ।

**विश्वमानवीयमहाकाव्ये उदारवादिचिन्तनम्**

बीकानेरनगरस्य वासिन: पं.विद्‌याधरशास्त्रिण: एकं महाकाव्यं अस्ति-'विश्वमानवीयम्' इति । शास्त्रिमहोदयस्य महाकाव्येऽस्मिन् नवसर्गा: सन्ति । एतस्मिन् विविधछन्दानां प्रयोग: कृत: । एतस्मिन् प्राकृतिकवर्णनानामनेकानेकरसानां अद्‌भुद् समन्वय: कृत: । एतस्मिन् न तु एकस्यैव नायकस्य जीवनचरित्रं वर्णितं नैव एकस्य कथाप्रसंगस्यैवाश्रय: गृहीत: । महाकाव्येऽस्मिन् नवसर्गेषु निम्नलिखिता: विषया: वर्णिता:-

**1.** विश्वव्यापिनी दृष्टि:
**2.** नवीनं यत् पुराणं तत् पुराणं च पुनर्नवम्
**3.** सर्वेऽन्योऽन्ये समाधिता:
**4.** नवीन जीवनं नित्यम्
**5.** प्रसुप्ता साम्प्रतं मति:
**6.** ब्रह्मर्षिदेश:
**7.** देवीप्रकाश:
**8.** ऐश्वरं दर्शनम्
**9.** लक्ष्यहीना: शिक्षालया:
**10.** उज्जयिनीपुरी
**11.** इष्टदेव-स्मरणसामर्थ्यम्
**12.** अज्ञेया कालगति:
**13.** त्वमेव माता च पिता त्वमेव
**14.** क्षणे क्षणे हन्त कृतोऽयमन्य:
**15.** वीरप्रशस्ति:
**16.** शक्तिप्रबोधनम्

**17.**वैयक्तिकी सामाजिकी च मानवीया महाशक्तिः
**18.**यो ददाति-यो भुङ्क्ते तत्र लक्ष्मीः प्रसीदति
**19.**अन्तर्दृष्टि-विकला अहम्भावग्रस्ता आधुनिका वैज्ञानिकाः
**20.**साधुवादैः सत्करणीयाश्च
**21.**न हिताय शाश्वतं धावनम्
**22.**क्षणं विरम्य चिन्त्यताम्
**23.**मादिनी चन्द्र चन्द्रिका
**24.**अभिनवो विध्वंसनशीलो दशमो मनुजग्रहः
**25.**कठिनव्रती सुधाकरः
**26.**कुरुत नैव सुधां विषमिश्रिताम्
**27.**सदैव सुपोष्याः स्वकुलकीर्ति-प्रदीपकाः गुणाः
**28.**मनः कोषमयाः भावामात्रानुप्राणिता विभुगतयः पितरः
**29.**न केवलं काल्पनिकः परलोकः
**30.**सुरक्ष्यं सदैव वैचारिकं शरीरम्
**31.**न सर्वे देवलोकाधिकारिणः
**32.**श्रौता मानवैः कल्पिताश्च द्विविधा देवाः
**33.**मानवीया देवा मानवस्वभावाः
**34.**पितरो महर्षयश्च न देवत्वाप्तिकामाः
**35.**सुरर्षिदर्शनम्
**36.**नवसर्ग-सर्जकः पुमान्
**37.**निखिलार्थ-सिद्धिप्रदायिनी वसुन्धरा
**38.**भोगमात्रनिरताद्भुता नाकगतिः
**39.**पार्थिवं वैशिष्ट्यम्
**40.**दिव्यं मानव-जीवनम्

उपर्युक्तायाः विषयसूच्याः आलोके एतन्महाकाव्यस्य उदारवादिचिन्तनसन्दर्भे सर्वप्रथममिदं श्लोकद्वयं द्रष्टव्यं यस्मिन् स्वार्थदृष्टिं परित्यज्य विश्वकल्याणकारिदृष्ट्याः ग्रहणस्योपदेशोऽभवत् -

विश्वरूपे हि लोकेतद् विश्वबुद्धिर्हितावहा ।
विधेया ख्ण्डिता नेयं स्वार्थदृष्ट्या हि कर्हिचित् ।।
परार्थे निहितः स्वार्थः प्रेक्ष्यतां सूक्ष्मया दृशा।
परेषां साधिते साध्ये स्वसाध्यं साध्यते स्वतः।। [1]

एतस्मिन् प्रसङ्गे बहवः उपदेशाः विश्वपरोकारस्य भावनायाः कृताः । एतस्य उपदेशबहुलप्रसङ्गस्य कश्चिदंशः द्रष्टव्यः यत्र मानवीयसंघर्षान् परित्यज्य विश्वहितस्य भावनायाः उपदेशः कृतोऽस्ति । अत्रैव अहिंसासत्यत्यागमैत्रीभावनापरोपकारसौहार्द्रादीनां विश्वमूल्यानामपि महत्वं प्रदर्शितम्-

मानवीया हि संघर्षाः निखिलाः स्वार्थमूलकाः
शोधिता स्वार्थलिप्सा चेत् स्वयं शान्ता भवन्ति ते।।
अहिंसा सत्यमस्तेयं . त्यागदानादयस्तथा
सर्वेऽप्येते हि धर्माङ्गाः सर्वेषां हित-साधकाः।।
व्यापके स्नेह-संसारे सर्वेषां हित-चिन्तके
विश्व-मैत्री हि सर्वेभ्यो वर्धते स्वयमात्मनि ॥
स्वार्थसिद्धौ रतं नित्यम् परार्थस्य च घातकम्
कलिप्रवर्तकं भावम् प्रवदन्ति विपश्चितः ।।
यस्मिन् भावे च सौहार्द सर्वेभ्यः परिपुष्यते
सद्भिस्तस्यैव सद्वृद्ध्यै लोकै नित्यम्प्रयत्यते।।
भावैः संकुचितैर्ग्रस्ते भौतिकेऽस्मिन् युगे बुधैः
व्यापकायात्मबोधाय प्रयत्यं तत्समाहितैः।। [2]

एवमेव द्वितीये सर्गे शिक्षालयानां लक्ष्यहीनतायाः प्रसङ्गे कविना पुनः बुद्धेः निर्मलतापूर्वकं समस्तजगतः कल्याणस्य कामना कृतास्ति-

मिथो हि कल्याणरताः समस्ता
ययापि बुद्ध्या निखिला भवेयुः ।
यथा च सर्वे सुखिनो जगत्यां
तथैव विज्ञैरधुना प्रयत्यम् ॥ [3]

उदारवादिचिन्तनस्य महत्वपूर्णावयवस्वरूपायाः विवेकशक्त्याः विषये कविना चतुर्थे सर्गे प्रोक्तं यत् विवेकिनां जनानां सामर्थ्यैः प्रत्येकस्य जनस्योन्नतिं कारयितुं शक्यते-

वैयक्तिक्यै: समुन्नत्यैर्भाव्यं: सर्वै:. विवेकिभि: ।
सामर्थ्यैरखिलैर्युक्ता: स्वयंसिद्धा-विवेकिन: ।। [4]

एवमेव उदारवादस्य चिन्तनस्य एकस्याद्‌वितीयस्य संगठनेतिगुणस्य विषये कविना प्रोक्तं यत्

> कलौ संगठने शत्ति: सिद्धान्तोऽयम् सनातन:।
> दुर्जनैस्तद् सतां स्थानें क्रियते किन्तु साम्प्रतम् ॥ [5]

राष्ट्रशक्ते: रक्षणायोपदेशं कुर्वन् कवि: कथयति यत् प्राणैरपि एतस्या: राष्ट्रशक्ते: रक्षणं कर्तव्यम्-

> राष्ट्रशक्ति: सदा रक्ष्या प्राणैरपि धनैरपि ।
> क्षीणेयं यत्र यत्र स्यात् सर्वं तत्र विशीर्यते॥[6]

कल्याणकारिराज्यस्य स्थापनायै आर्थिकनीतीनां विषये कवि: उपदिशति यत् यत् राज्यं व्यर्थं व्ययं न कुर्यात् । व्यर्थे व्यये कृते प्रजाजना: विविधै करै: ग्रस्ता: भवन्ति ।

> राज्येनापि व्ययो व्यर्थो नैव कार्य: कदाचन ।
> कृते यस्य करै: ग्रस्ता: विधीयन्ते मुहुर्जना:।। [7]

सदाचरणस्योपदेशं कुर्वन् कवि: कथयति यत् मिथ: सद्भावपूर्णव्यवहारेण एव एतत् सम्पूर्णं जगत् सुखपूर्णं हर्षितञ्च भवितुं शक्यते । दुर्भावनया एषा सृष्टि: विकारयुक्ता भवति ।

> निजैर्योगोऽयं न: प्रचलति सदैवादि-समयात्
> इमे द्यावाभूमी सकलसुखपूर्णे हि भवत: ।
> मिथ: सद्भिर्भावै: कुरुत जगतीं हृप्टचरिताम्
> कुभावैश्चाकृत्यै: कुरुत वत नेमां हि विकृताम्।। [8]

एवं एते सर्वे पं.विद्याधरशास्त्रिमहोदयस्य विश्वमानवीये महाकाव्ये प्राप्ता: उदारवादिचिन्तनसन्दर्भा: । विश्वमानवीयस्याध्ययनेन इदं ज्ञायते यत् महाकाव्यमिदं निश्चितरूपेण विश्वभावनाया: विकासायोदात्तानां वैश्विकानां च जीवनमूल्यानां स्थापनां कर्तुं सक्षममस्ति ।

**संदर्भ**


1. विश्वमानवीयम्, **1/9-10**
2. विश्वमानवीयम्, **1/17-22**
3. विश्वमानवीयम्, **2/43**
4. विश्वमानवीयम्, **4/31**
5. विश्वमानवीयम्, **4/34**
6. विश्वमानवीयम्, **4/39**
7. विश्वमानवीयम्, **4/47**
8. विश्वमानवीयम्, **7/42**